# श्रीकल्पकाम्बिका प्रपत्तिस्तोत्रम्

Shri Kalpakambika Prapatti Stotram

sanskritdocuments.org

July 2, 2019

# Shri Kalpakambika Prapatti Stotram

# श्रीकल्पकाम्बिका प्रपत्तिस्तोत्रम्

## Sanskrit Document Information

Text title : Kalpakambika Prapatti Stotram

File name : kalpakAmbikAprapattistotram.itx

Category : prapatti, devii, devI, otherforms

Location : doc_devii

Author : sheShashAyIsharmA

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : July 2, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

July 2, 2019

*sanskritdocuments.org*

# श्रीकल्पकाम्बिका प्रपत्तिस्तोत्रम्

वन्द्यामरेन्द्रमुनिवर्यनतिप्रसन्ने
तं भावयामि शरणं यमवारणार्थम् ।
यं शम्भुराश्रयति शिवे प्रणयप्रलाप-
निर्मुक्तगूढरमणीशुभनामधेयः ॥ १॥

स्तोष्ये भक्त्या पादयुगं ते भवनाशे
यस्मिन् लीनं जन्मभिया तत्सूरिकुलम् ।
यस्मिन् दृष्टे दृष्टमनन्तं सुखलास्यं
तं ते कल्पतरुं पदपल्लवमहमीडे ॥ २॥

शान्त्या तुष्ट्या भक्तिरसाक्ता मतिकेलिः
कालाकालद्रावणशीलं कर्मफलम् ।
हित्वा लोला यस्मिन् कूर्मे नीलतनोः
तं ते कल्पद्रुमपदपल्लवमहमीडे ॥ ३॥

पूम्पावै सा त्वत्पदभक्त्या मृत्युकरात्
सम्बन्धेन त्वत्पदभक्तिप्रेमबलात् ।
लब्ध्वा चित्रं चित्रमितीत्थं शुभमूलं
तं ते कल्पद्रुमपदपल्लवमहमीडे ॥ ४॥

कीर्त्तिः पर्वतराजकुमर्याः कथनीया
भर्त्तारं तं मारजितं ते सञ्चक्रे ।
सत्याः पूर्वं देहलये या संप्राप्ता
यस्यास्तस्याः कम्रपदाम्बुजमहमीडे ॥ ५॥

उद्यद्भास्कररश्मिसमानां ते कान्तिं
बालारूपे हृदयगतायाः पश्यन् किम् ।
गूर्जरदेशे कुङ्कुमलिप्तं पादयुगं
तं ते कल्पद्रुमपदपल्लवमहमीडे ॥ ६॥

कृत्वा चित्ते यत्पदकञ्जं भूमिसुतः
    कान्तिं प्रापद्रक्तसुरम्यां शक्तिकरः ।
रक्तिस्संसृतिकारणभूता द्रवतीह
    तं ते कल्पद्रुमपदपल्लवमहमीडे ॥ ७॥

भास्कररायो वित्तविहीनो ऋणनाशे
    ध्यात्वा अपर्णातत्त्वफलाक्तं पादयुगम् ।
लेभे शान्तिं ऋणभवखेदान्निर्मुक्तो
    यस्मात्तस्माद्भाग्यविदायिनमहमीडे ॥ ८॥

काली तारा सुन्दरि भुवने सर्वशिवे
    भैरव्यस्तशिरोधरधूमा भगवक्त्रा । बकवक्त्रा
मातङ्ग्याख्या कमलभवा ते दश नार्यः
    पादध्याने दद्याद्वयुनं पूर्णफलम् ॥ ९॥

मध्ये यामे यामिन्यर्थे यतचित्ते
    विद्युत्तुल्या पादलता ते प्रादुरभूत् ।
तस्मात्कन्ये तरुणि सुवृत्ते कटिबद्धा
    सञ्चर रम्ये मद्गृहमध्ये मम बाले ॥ १०॥

वेङ्कटपुत्रः शेषशिशुस्ते पदकञ्जे
    वन्दनपद्यं चित्तसुमाख्यं चित्तभवम् ।
अर्पयतीहाच्युतपदलोलः शम्भुधवे
    यस्माद्भूयात्संसृतिनाशो ध्रुवमेव ॥ ११॥

इति वाधूलगोत्रोद्भवेन श्रीवेङ्कटेश्वरार्यस्य
पुत्रेण श्रीशेषशायीशर्माख्येन विरचितं
श्रीकल्पकाम्बिका प्रपत्तिस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Kalpakambika Prapatti Stotram*

pdf was typeset on July 2, 2019

Please send corrections to *sanskrit@cheerful.com*